# माध्यमिकशिक्षापाठ्यक्रमः
## संस्कृतम् (ऐच्छिकम्)

**कक्षा ११–१२** **विषयसङ्केतः : (कक्षा ११** San. 359 **कक्षा १२** San. 360)

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

संस्कृतवाङ्मयं बह्वायामिकज्ञानधाराया निरवच्छिन्नं स्रोतो वर्तते । एतस्मिन् वाङ्मये निबद्धा निखिला विषया मानवजातेरुपकाराय जगतो हिताय च सन्ति । संस्कृते निगूढामुपयोगिनीं विद्यामधीत्यानुशील्य तदनुकूल्येन समाचर्य च विश्वमानवाः स्वहितं समासादयन्तो दृश्यन्ते । संस्कृतस्य एतदेव वैशिष्ट्यं निभाल्य विश्वमिदानीमिमं ज्ञानविज्ञानयोरक्षयराशिं प्रति समाकृष्टं वर्तते । कतिपयराष्ट्रैः स्वकीयौपचारिकशिक्षासरण्यां संस्कृतं समहत्त्वं समाविष्टञ्चास्ति । नेपालेऽपि संस्कृतशिक्षायाश्चिरन्तनी परम्परा वर्तते । प्राचीनकाले संस्कृतं शिक्षायाः पर्यायत्वेन बुद्ध्यते स्म । विद्याप्रेमिणां शिक्षासचेष्टानाञ्च जनानां प्रतिगृहमनौपचारिकगुरुकुलमिवासीत् । देशे औपचारिकशिक्षायाः प्रवर्तनानन्तरमपि विद्यालयस्तरात् संस्कृतस्य पठनपाठने सञ्चलिते सत्यपि एतस्यापेक्षितविस्तरणमावश्यकमेवास्ते । इमामेव सामयिकावश्यकतां विचार्य सर्वेषां कृते संस्कृतमिति मान्यतामनुसृत्य चैतस्य वाङ्मयस्य व्यावहारिकान् लोकमङ्गलकारिणश्च विषयान् समाविश्य पाठ्यक्रमोऽयं विकसितो वर्तते । अधीतसंस्कृताः संस्कृतं पिपठिषवश्च विद्यार्थिनोऽत्र समाविष्टानि विषयवस्तून्यधीत्योच्चशिक्षाप्तये भाषिकवैषयिकशिल्पावबोधार्हत्वं समर्ज्य बाह्याभ्यन्तरव्यक्तित्वचरितयोर्विकसनपूर्वकं चतुरस्रमुन्नतिमाप्नुयुरिति विश्वसितं वर्तते ।

शिक्षाया राष्ट्रियोद्देश्यस्यावश्यकतायाश्च परिपूरणत्वेनाभिभावकानामभियाचनायाः परिपूर्तये, कृतविद्यानां शिक्षाविदाञ्च परामर्शनेन, संस्कृतप्रेमिणां प्रेरणया च निर्मितः पाठ्यक्रमोऽयमाधारभूतस्तरस्योच्चस्तरस्य च संस्कृतशिक्षायाः सेतुर्भूतो वर्तते । अनेन पाठ्यक्रमेणाधारभूतस्तरस्य ज्ञानशिल्पकौशलानि प्रवर्ध्य परिमार्ज्य चोच्चस्तरीयज्ञानशिल्पकौशलानि विकसय्य विषयवस्तुनः शास्त्रीयगाम्भीर्यस्यानुशीलनाय पूर्वपीठिका विनिर्मिताऽस्ति । पाठ्यक्रमेऽस्मिन् गद्यपद्ययोर्विधासु विषयक्षेत्रानुषङ्गिकविषयविस्तार-योग्यताविस्तारानुप्रयुक्त-व्याकरणसम्बद्धानि विषयवस्तूनि समाविष्टानि वर्तन्ते । एतेषां विषयाणां सुशिक्षणेन विद्यार्थिनः संस्कृतभाषायां दैनिकव्यवहारे नैपुण्यमपाप्स्यन्तीत्यपेक्षितमस्ति । विद्यार्थिनां वयोऽनुरूपं रुच्यावश्यकते, समाजस्यापेक्षाम्, शिक्षाया उद्देश्यानि च लक्ष्यीकृत्यात्र पाठ्यवस्तूनि समाविष्टानि सन्ति । सर्वेषां पाठ्यवस्तूनां शिक्षणेन विद्यार्थिनो भाषायाश्चत्वारि शिल्पकौशलानि सारल्येन सहजतया चाधिगमिष्यन्ति । विषयवस्तुभिर्भाषिककौशलार्जनं भाषिककौशलाभ्यासेन विषयवस्तूनां

गभीरानुशीलनपुरस्सरम् अनुकरणीयचरितनिर्माणाय उत्प्रेरणमुच्चस्तरीयसंस्कृतशिक्षाया अध्ययनाय योग्यत्वप्रवर्तनञ्चास्य पाठ्यक्रमस्य नवीनं वैशिष्ट्यं वर्तते । विधागतवैविध्यम्, व्यावहारिकलेखन-भाषणाभ्यासः, नेपालस्य मौलिकधर्म-संस्कृति-कला-सभ्यतानां संरक्षणायोत्प्रेरणम्, प्राकृतिकसम्पदां सुरक्षासदुपयोगयोर्जागरणम्, वनस्पत्यौषधानां सेवनेन स्वास्थ्यसुरक्षणोपायदर्शनम्, सर्वेषां कृते संस्कृतमिति मान्यतानुसारेण पाठ्यवस्तूनां चयने समावेशितासिद्धान्तस्यानुपालनञ्चास्य पाठ्यक्रमस्यापराणि वैशिष्ट्यानि विद्यन्ते । नेपालमत्रत्यानि गौरव-वैभव-वैशिष्ट्यानि च केन्द्रविन्दौ निधाय निर्मितोऽयं पाठ्यक्रमो विद्यार्थि-शिक्षकाभिभावकानामध्यवसायेन साफल्यमवाप्स्यतीति विश्वस्यते ।

पाठ्यक्रमोऽसौ विषयपरिचयः, स्तरगतयोग्यताः, कक्षागतशिक्षणोपलब्धयः, समग्रपाठ्यवस्तुविवरणम्, शिक्षणसहजीकरणप्रक्रिया, विद्यार्थिमूल्याङ्कनञ्चेत्यादिपक्षान् समाविश्य विकासं नीतोऽस्ति । पाठ्यक्रमेऽस्मिन् प्रयोगसिद्धामाधुनिकशिक्षणपद्धतिमवलम्ब्य पाठ्यविषयाणां विस्तारस्तथा विहितोऽस्ति यथा चाधुनातनशिक्षणपद्धत्या अपेक्षितानि पाठ्यविषयोपलब्धिभूतानि विद्यार्थिनां श्रवण-भाषण-पठन-लेखन-कौशलानि विकसितानि भवेयुः, यथा च पुनस्ते पाठ्यविषयलक्ष्यभूता विषयज्ञान-बोध-शिल्पोच्चदक्षताः सारल्येन समवाप्नुयुः । अत्र सन्निविष्टा विषया विद्यार्थिनां शिल्पाभिवृ्यभिव्यक्तिकलानां विकासाय प्रयोगप्रधानं व्यावहारिकञ्च शिक्षणविधिं भृशमुपकुर्युरिति उद्देश्यञ्चानेन पाठ्यक्रमेणानेन आत्मसात्कृतो विषयः । पाठ्यक्रमनिहिता भाषिक-सामाजिक-नैतिक-पौराणिकैतिहासिक-काव्यीय-मनोवैज्ञानिक-सेवाविषयकाद्यनेकपक्षा विषयदृष्ट्या पाठ्यक्रमं सबलीकुर्युः, अपि च शिक्षणसहजीकरणसम्बद्धाः प्रदर्शनात्मकप्रश्नोत्तरप्रक्रिया, अभिनयात्मकसंवादः, स्वाध्यायपरामर्शपद्धतिः, औत्सुक्यवर्धकक्रियाकलापाः, निर्माणात्मकनिर्णयात्मकमूल्याङ्कन-प्रक्रिया, सैद्धान्तिकेन आन्तरेण च मूल्याङ्कनेन सिद्धा वैज्ञानिकी परीक्षणपद्धतिश्च शिक्षणपद्धतिदृष्ट्या पाठ्यक्रमम् अमुम् उपकुर्युरिति च पाठ्यक्रमेणानेन समुद्दिष्टो विषयः । पाठ्यक्रमेऽस्मिन् पाठ्यविषयसंयोजनविधौ, स्तरगतक्षमता-कक्षागतशिक्षणोपलब्धिविस्तारविधौ, शिक्षणविधि-मूल्याङ्कनप्रविधिप्रस्तुतौ च पूर्वकक्षाभिस्सह चोत्तरोत्तरं सोपानक्रमिकं सन्तुलनं स्यादिति विषये विशेषावधानं दत्तमस्ति । केवलसैद्धान्तिकज्ञानापेक्षया विद्यार्थिनामाचार-व्यवहार-विचारादिसम्बलितं चतुरस्रं व्यक्तित्वं वर्धेत इति पाठ्यक्रमस्यास्य प्रधानं लक्ष्यमस्ति ।

## २. विषयानुगताः क्षमताः

**माध्यमिकस्तरस्य नवमदशमकक्षयोः संस्कृतभाषाविषयमधीत्य विद्यार्थिनोऽधस्तनविषयेषु क्षमा भविष्यन्ति-**

१. वर्ण-शब्द-वाक्यानां नियमेनोच्चारणे
२. संस्कृतभाषाभ्यसनेन संस्कृतवाङ्मयस्यानुशीलनाय जागरणप्रदर्शने
३. संस्कृतस्य गद्यपद्ययोर्यथानियमं पठने विषयबोधे च
४. नेपालीभाषायां मातृभाषायाञ्च बाहुल्येन प्रयुज्यमानानां संस्कृतशब्दानामभिज्ञानेनार्थानुकूलप्रयोगे
५. नैपालकसंस्कृतेर्वैशिष्ट्यमनुशील्य स्वसंस्कृतेः परिपालने
६. नेपालीभाषया मातृभाषया स्वसंस्कृत्या च सह संस्कृतस्य सम्बन्धान्वेषणे
७. उच्चशिक्षायां संस्कृतवाङ्मयस्याध्ययनाय योग्यतार्जने

८. भाषिकशिल्पार्जनपूर्वकं सदाचारस्य मौलिकविशेषतानाञ्च प्रस्तुतौ
९. सर्वविधेषु प्राकृतवस्तुषु प्राणिषु च समभावप्रदर्शने पर्यावरणसंरक्षणाय जागरणप्रदर्शने च
१०. नागरिककर्तव्यपरिपालनेन राष्ट्रभक्तिप्रदर्शने
११. दैनिकव्यवहारसम्पादनाय संस्कृतभाषायाः प्रयोगे

## ३. **कक्षागतशिक्षणोपलब्धयः,** कक्षा ११

श्रवणं भाषणञ्च

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. वर्ण-पद-वाक्यानां यथाश्रुत्युच्चारणम् | १.१ वर्णान् श्रुत्वा शुद्धतयोच्चारणम्<br>१.२ संस्कृतपदानामनूच्चारणम्<br>१.३ पठितानामपठितानाञ्च वाक्यानां शुद्धोच्चारणम् |
| २. गद्यपद्यांशानामनुवाचनम् | २.१ श्रुतस्य गद्यांशस्य वाचनम्<br>२.२ गद्यांशस्य नियमानुकूलं भाषणम्<br>२.३ लयमनुसृत्य पद्यस्यानुवाचनम्<br>२.४ पठितपद्यानां गति-यति-लयनिर्धारणेन गायनम् |
| ३. लयसंयोजनेन श्रुतस्य गीतस्य गायनम् | ३.१ लयानुशीलनेन गीतं श्रुत्वा प्रतिक्रियाभिव्यञ्जनम्<br>३.२ पाठस्थगीतस्य यथालयं गायनम्<br>३.३ गीतस्थपदानां लयानुकूलं वाचनम्<br>३.४ श्रुतस्य गीतस्य भावप्रकटनम् |
| ४. पठितपदानामर्थानुकूलप्रयोगेण वाक्यनिर्माणम् | ४.१ पठितपदानां सान्दर्भिकार्थप्रकटनम्<br>४.२ अर्थं श्रुत्वा पाठस्थशब्दानामन्वेषणम्<br>४.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>४.४ पठितपदानां वाक्येषु योजनम् |
| ५. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ५.१ पठितविषयवस्त्वाधारेण प्रश्ननिर्माणम्<br>५.२ पठितेषु श्रुतेषु च विषयेषु जिज्ञासाभिव्यञ्जनम्<br>५.३ पठितविषयाधृतप्रश्नानामुत्तरणम् |
| ६. क्रम-संरचनाबोधेन पाठस्थचरितानां परिचायनेन च श्रुत-पठितानुभूतविषयवस्तुनः सार-भावप्रकाशनम् | ६.१ पठितस्य श्रुतस्यानुभूतस्य वा विषयवस्तुनः सारभावयोः कथनम्<br>६.२ निर्दिष्टविषयवस्तुनो विधागतसंरचनाभिव्यञ्जनम् |

| | |
|---|---|
| | ६.३ पठितानां श्रुतानामनुभूतानाञ्च विषयवस्तूनां यथाक्रमं प्रस्तुतिः<br>६.४ पाठस्थचरितानां वैशिष्ट्यप्रकाशनेन परिचायनम् |
| ७. परिचितविषयेषु सतर्कं मतोपस्थापनम् | ७.१ श्रुतस्य दृष्टस्य पठितस्यानुभूतस्य वा विषयवस्तुनः स्वशब्दैः प्रकटनम्<br>७.२ परिचितविषयस्य वर्णनम्<br>७.३ अनुभूतसमस्यायां स्वमतप्रकाशनम् |
| ८. पाठस्थभाषातत्त्वानां सपरिचयं स्वरूपनिगदनम् | ८.१ वर्णोच्चारणस्थानप्रयत्नानां भेदकथनम्<br>८.२ वर्णान् श्रुत्वा तेषां स्थानाभ्यन्तरप्रयत्न-बाह्यप्रयत्ननिगदनम्<br>८.३ पाठानुप्रयुक्तसन्धीनां सनामं नियमकथनम्<br>८.४ निर्धारितानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>८.५ पाठप्रयुक्तानां प्रेरणार्थकवाक्यानां निदर्शनम्<br>८.६ पठितानां स्त्रीत्वविशिष्टपदानां परिचायनम्<br>८.७ क्रियापदाधारेण पाठप्रयुक्तवाक्यानां कालनिर्धारणम्<br>८.८ पाठप्रयुक्तानामव्ययपदानां निदर्शनम्<br>८.९ निर्दिष्टैः कृत्तद्धितप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानामभिव्यञ्जनम्<br>८.१० पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम्<br>८.११ पाठे प्रयुक्तानि तत्पुरुषाव्ययीभावसमासनिष्पन्नपदानि परिचित्य तेषां विग्रहवाक्यकथनम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पद्यस्य गीतस्य च यथालयं वाचनम् | १.१ लयमनुसृत्य पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिस्थलनिर्धारणम्<br>१.३ लयावगमनेन गीतस्य पठनम्<br>१.४ पठितस्य गीतस्य पद्यस्य च भावप्रकाशनम् |
| २. विषयावबोधेन निर्धारितगद्यांशस्य सस्वरं मौनं द्रुतं वा पठनम् | २.१ विरामादिचिह्नानां पालनेन गद्यांशस्य सस्वरं वाचनम्<br>२.२ सन्धिस्थलानि निश्चित्य निर्धारितगद्यांशस्य पठनम्<br>२.३ पदानां यथाविध्युच्चारणेन गद्यांशस्य द्रुतपठनम्<br>२.४ पाठ्यवस्तूनां मौनपठनेन अज्ञातार्थानां पदानां सङ्कलनमर्थान्वेषणञ्च |

| | |
|---|---|
| | २.५ गद्यांशस्य मौनपठनेन तद्गतविषयप्रकाशनम्<br>२.६ पाठ्यांशमधीत्य प्रमुखविषयाणां यथाक्रममुपस्थापनम्<br>२.७ गद्यांशमधीत्य तस्य सारसन्देशकथनम् |
| ३. साभिनयं संवादस्य पठनम् | ३.१ संरचनागततत्त्वावबोधने संवादस्य पठनम्<br>३.२ सहपाठिभिः सह संवादस्य साभिनयं पठनम्<br>३.३. निर्धारितसंवादमधीत्य तद्गतविषयप्रकाशनम् |
| ४. निर्दिष्टविषयवस्तूनां पठनेन प्रश्नोत्तरणम् | ४.१ विषयवस्तून्यधीत्य तत्सम्बद्धप्रश्ननिर्माणम्<br>४.२ पठितस्य पाठस्य विषयवस्तूनां प्रकटनम्<br>४.३ निर्दिष्टविषयवस्तूनामध्ययनेन तत्सम्बद्धप्रश्नानामुत्तरणम्<br>४.४ पाठमधीत्य सारगर्भितवाक्यानां भावविस्तरणम् |
| ५. पाठातिरिक्तसामग्रीः पठित्वा विषयवर्णनम् | ५.१ पाठातिरिक्तानां निर्दिष्टसामग्रीणां पठनेन विषयप्रकाशनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयेऽभिव्यक्तिप्रकटनम्<br>५.३ पठितविषये स्वाभिमतप्रकटनम् |
| ६. पाठगतभाषातत्त्वानामनुशीलनम् | ६.१ वर्णोच्चारणस्थानप्रयत्नानां पठनम्<br>६.२ सोदाहरणं पाठानुप्रयुक्तसन्धिनियमानां पठनम्<br>६.३ निर्धारितानां शब्दानां धातूनाञ्च रूपावलिपठनम्<br>६.४ वाक्यानि पठित्वा प्रेरणार्थकवाक्यस्वरूपनिगदनम्<br>६.५ निर्दिष्टप्रत्ययैः स्त्रीत्वप्रक्रियायाः पठनेन पुंलिङ्गशब्दानां स्त्रीलिङ्गे परिवर्तनम्<br>६.६ क्रियापदाधारेण कालं निर्धार्य पाठप्रयुक्तवाक्यानां पठनम्<br>६.७ सार्थं पाठप्रयुक्तानामव्ययपदानां तन्निर्मितवाक्यानाञ्च पठनम्<br>६.८ पाठं पठित्वा निर्दिष्टैः कृत्तद्धितप्रत्ययैर्निष्पन्नानां पदानां प्रकृतिप्रत्ययविभाजनम्<br>६.९ सोदाहरणं पाठप्रयुक्तानां कारकविभक्तिनियमानामध्ययनम्<br>६.१० विग्रहवाक्यपठनेन पाठप्रयुक्तानां तत्पुरुषाव्ययीभावसमासनिष्पन्नपदानामर्थनिर्धारणम् |
| ७. पाठगतानामानुषङ्गिकविषयाणामध्ययनम् | ७.१ नारीसम्मान-प्रकृतिपूजन-पौरस्त्यवाङ्मय-स्वास्थ्यरक्षासम्बद्धनिर्धारितसामग्रीः पठित्वा तासामनुशीलनम्<br>७.२ निर्धारितसामग्रीणां पठनेन सङ्ख्यावाचकशब्दैर्व्यवहरणम् |

| | |
|---|---|
| | ७.३ निर्दिष्टसामग्रीरधीत्य संस्कृतभाषायाः पौरस्त्यवाङ्मयस्य नैपालकसंस्कृतिसभ्यतानां पौरस्त्यसंस्काराणाञ्च महत्त्वाख्यापनम्<br>७.४ निर्धारितविषयाणामध्ययनेन विशिष्टमहिमयुतानां स्थलानां चरितानाञ्च परिचायनम्<br>७.५ निर्दिष्टसामग्रीणां पठनेन संस्कृतेः परम्परायाश्च रक्षायै जागरणप्रदर्शनम्<br>७.६ निर्धारितसामग्र्या अध्ययनेन गुरुपरम्परायाः पुरुषार्थस्य सुशासनस्य च परिचायनम्<br>७.७ प्रदत्तसामग्रीः संपठ्य विकासवाद-दशावतारक्रमयोः आर्षाधुनिकसभ्यतयोश्च मिथस्तोलनम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पदानां वाक्यानाञ्च शुद्धतया लेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पदानां वाक्यानाञ्च शुद्धतयानुलेखनम्<br>१.३ अशुद्धिनिराकरणेन पदानां वाक्यानाञ्च लेखनम्<br>१.४ पठितपदवाक्यानुच्छेदानां शुद्धलेखनम् |
| २. अर्थमनतिक्रम्य पठितपदानां वाक्येषु योजनम् | २.१ पठितपदानां पाठानुकूल्येनार्थापनम्<br>२.२ पठितपदानां पर्यायान्वेषणं प्रयोगश्च<br>२.३ अनेकार्थकपदानां प्रयोगप्रदर्शनम्<br>२.४ विलोमपदं प्रतिष्ठाप्य विपरीतार्थे वाक्यपरिवर्तनम्<br>२.५ पठितपदानां योजनेन वाक्यनिर्माणम् |
| ३. अनुच्छेदं पठित्वा प्रश्नोत्तरणम् | ३.१ सरलानुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदान्निर्मितानां प्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सारसङ्क्षेपलेखनम्<br>३.४ निर्दिष्टानुच्छेदतः प्रमुखविषयाणां सूत्रीकरणम् |
| ४. पठितविषयमाधृत्य प्रश्ननिर्माणमुत्तरप्रदानञ्च | ४.१ पठितविषयवस्तुन आधारेण प्रश्नोपस्थापनम्<br>४.२ प्रश्नार्थकपदैर्वाक्यस्थपदं प्रतिष्ठाप्य प्रश्ननिर्माणम्<br>४.३ प्रश्नप्रकृतिमभिज्ञाय तदनुकूलोत्तरप्रदानम् |

| | |
|---|---|
| | ४.४ पाठसम्बद्धप्रश्नानामुत्तरलेखनम् |
| ५. निर्दिष्टगद्यपद्यांशयोर्विषयप्रकाशनम् | ५.१ पठितगद्यांशानां सार-सन्देशलेखनम्<br>५.२ पठितानां पद्यानां गीतानाञ्च सान्वयं भावार्थप्रकाशनम्<br>५.३ पाठगतसुभाषितानां भावस्य विशदीकरणम्<br>५.४ पाठगतचरितानां चारित्रिकवैशिष्ट्यप्रकाशनम्<br>५.५ सतर्कं पठितविषयवर्णनम्<br>५.६ पाठस्थविशिष्टवाक्यानां सप्रसङ्गं व्याख्यानम् |
| ६. निर्दिष्टविषयेषु सर्जनात्मकलेखनम् | ६.१ परिचितविषयाणां लिखितवर्णनम्<br>६.२ निर्दिष्टविषयमाधृत्य लघुकथालेखनम्<br>६.३ पद्यस्य संवादस्य च स्वशब्दैर्गद्ये रूपान्तरणम्<br>६.४ प्रदत्ततथ्याङ्कस्य पठितस्य चाधारेण जीवनवृत्तलेखनम्<br>६.५ निर्दिष्टविषये कार्यालयीयपत्रलेखनम्<br>६.६ पठितमनुभूतञ्च विषयमवलम्ब्यानुच्छेद-लघुप्रबन्धरचना<br>६.७ प्रदत्तविवरणमाधृत्य संवादलेखनम् |
| ७. आनुषङ्गिकविषयमनुशील्य मौलिकलेखनम् | ७.१ नारीसम्मान-प्रकृतिपूजन-पौरस्त्यवाङ्मय-स्वास्थ्यरक्षाविषयेषु निर्देशानुसारेण मौलिकलेखनम्<br>७.२ सङ्ख्यावाचकपदानां प्रयोगेण व्यावहारिकवाक्यलेखनम्<br>७.३ पौरस्त्यवाङ्मयस्य परिचायनेन नैपालकसंस्कृतिसभ्यतानां पौरस्त्यसंस्काराणाञ्च महत्त्वप्रकाशनम्<br>७.४ तुलसी-पिप्पलादिवनस्पतीनामार्द्रक-जीरक-हरिद्रादिवेशवाराणाञ्च वैज्ञानिकमहत्त्वाख्यापनम्<br>७.५ निर्धारितविषयाणामध्ययनेन विशिष्टमहिमयुतानां स्थलानां चरितानाञ्च परिचायनम्<br>७.६ निर्दिष्टायाः संस्कृतेः परम्परायाश्च रक्षणोपायप्रतिपादनम्<br>७.७ रामराज्यस्य शासनपद्धतिं परिचाय्य सुशासनस्य महत्त्वप्रकाशनम्<br>७.८ विकासवाद-दशावतारक्रमयोः आर्षाधुनिकसभ्यतयोश्च सम्बन्धनिरूपणम् |

| | |
|---|---|
| | ७.९ निर्दिष्टप्रेरकव्यक्तिसम्बद्धसामग्रीराधृत्य पौरस्त्यशिक्षायां समभावोपपादनम्<br>७.१० निर्धारितसामग्र्याधारेण प्राकृतभाषास्वन्यभाषासु जैन-बौद्धदर्शनयोश्च संस्कृतस्य प्रभावान्वेषणेन संस्कृताध्ययनस्यावश्यकत्वप्रतिपादनम् |
| ८. अनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषयाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तस्य पठितानुच्छेदस्य नेपालिभाषायामनुवादः<br>८.४ नेपालिभाषायाः सरलवाक्यैर्निर्मितस्यानुच्छेदस्य संस्कृतेऽनुवादः |
| ९. पाठानुप्रयुक्तभाषातत्त्वानां प्रयोगः | ९.१ वर्णानां स्थानप्रयत्ननिर्धारणम्<br>९.२ प्रमुखसन्धिनियमानाधृत्य सन्धिविधानं सन्धिविच्छेदनञ्च<br>९.३ निर्धारितानां शब्दानां धातूनाञ्च रूपावल्याः प्रयोगः<br>९.४ पाठप्रयुक्तानामव्ययपदानां वाक्येषु योजनम्<br>९.५ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययविच्छेदनं वाक्येषु प्रयोगश्च<br>९.६ पाठे प्रयुक्तानां कारकविभक्तीनां कालानां विध्याद्यर्थानाञ्च च यथानिर्देशं प्रयोगः<br>९.७ पठितानां वाक्यानां प्रेरणार्थे परिवर्तनम्<br>९.८ पाठे प्रयुक्तानां समस्तपदानां वाक्ये प्रयोगकौशलप्रदर्शनम् । |

कक्षा १२

श्रवणं भाषणञ्च

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. वर्ण-पद-वाक्यानां श्रुत्यनुसारेणोच्चारणम् | १.१ वर्णान् श्रुत्वा शुद्धतयोच्चारणम्<br>१.२ संस्कृतपदानामनूच्चारणम्<br>१.३ पठितानामपठितानाञ्च वाक्यानां शुद्धोच्चारणम् |
| २. सस्वरं गद्यपद्यांशानां वाचनम् | २.१ श्रुतस्य गद्यांशस्य वाचनम्<br>२.२ गद्यांशस्य नियमानुकूलं भाषणम् |

| | |
|---|---|
| | २.३ लयमनुसृत्य पद्यस्यानुवाचनम्<br>२.४ पठितपद्यानां गति-यति-लयनिर्धारणेन गायनम् |
| ३. लयनुशीलनेन श्रुतस्य गीतस्य गायनम् | ३.१ लयानुशीलनेन गीतं श्रुत्वा प्रतिक्रियाभिव्यञ्जनम्<br>३.२ पाठस्थगीतस्य यथालयं गायनम्<br>३.३ गीतस्थपदानां लयानुकूलं वाचनम्<br>३.४ श्रुतस्य गीतस्य भावप्रकटनम् |
| ४. अर्थमनुशील्य पठितपदानां प्रयोगेण वाक्यकथनम् | ४.१ पठितपदानां सान्दर्भिकार्थप्रकटनम्<br>४.२ अर्थं श्रुत्वा पाठस्थशब्दानामन्वेषणम्<br>४.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>४.४ पठितपदानां वाक्येषु योजनम् |
| ५. पठितविषये प्रश्नोत्तरणम् | ५.१ पठितविषयवस्त्वाधारेण प्रश्ननिर्माणम्<br>५.२ पठितेषु श्रुतेषु च विषयेषु जिज्ञासाभिव्यञ्जनम्<br>५.३ पठितविषयाधृतप्रश्नानामुत्तरणम् |
| ६. क्रम-संरचनाबधपूर्वकं पाठस्थचरितानां परिचायनं श्रुत-पठितानुभूतविषयवस्तुनः सार-भावप्रकाशनञ्च | ६.१ पठितस्य श्रुतस्यानुभूतस्य वा विषयवस्तुनः सारभावयोः कथनम्<br>६.२ निर्दिष्टविषयवस्तुनो विधागतसंरचनाभिव्यञ्जनम्<br>६.३ पठितानां श्रुतानामनुभूतानाञ्च विषयवस्तूनां यथाक्रमं प्रस्तुतिः<br>६.४ पाठस्थचरितानां वैशिष्ट्यप्रकाशनेन परिचायनम् |
| ७. परिचितविषयेषु तर्कोपस्थापनेन स्वमताभिव्यञ्जनम् | ७.१ श्रुतस्य दृष्टस्य पठितस्यानुभूतस्य वा विषयवस्तुनः स्वशब्दैः प्रकटनम्<br>७.२ परिचितविषयस्य वर्णनम्<br>७.३ अनुभूतसमस्यायां स्वमतप्रकाशनम् |
| ८. पाठस्थभाषातत्त्वानां सोदाहरणं परिचायनम् | ८.१ वर्णानां स्थानप्रयत्नानां भेदकथनम्<br>८.२ वर्णान् श्रुत्वा तेषां स्थानप्रयत्ननिगदनम्<br>८.३ पाठानुप्रयुक्तसन्धीनां सनामं नियमकथनम्<br>८.४ निर्धारितानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>८.५ पाठे प्रयुक्तानां वाक्यानां वाच्यनिदर्शनम्<br>८.६ पाठप्रयुक्तवाक्यानां कालनिर्धारणम्<br>८.७ पाठप्रयुक्तानामव्ययपदानामर्थनिदर्शनम्<br>८.८ निर्दिष्टैः कृत्तद्धितप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां |

| | |
|---|---|
| | निदर्शनम्<br>८.९ पाठे प्रयुक्तानि समस्तपदानि परिचित्य तेषां विग्रहवाक्यकथनम् |

पठनम्

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. लयसंयोजनेन पद्यस्य गीतस्य च वाचनम् | १.१ लयमनुसृत्य पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिस्थलनिर्धारणम्<br>१.३ लयावगमनेन गीतस्य पठनम्<br>१.४ पठितस्य गीतस्य पद्यस्य च भावप्रकाशनम् |
| २. निर्धारितगद्यांशस्य विषयावबोधेन सस्वरं मौनं द्रुतं वा पठनम् | २.१ विरामादिचिह्नानां पालनेन गद्यांशस्य सस्वरं वाचनम्<br>२.२ सन्धिस्थलानि निश्चित्य निर्धारितगद्यांशस्य पठनम्<br>२.३ पदानां यथाविध्युच्चारणेन गद्यांशस्य द्रुतपठनम्<br>२.४ पाठ्यवस्तूनां मौनपठनेन अज्ञातार्थानां पदानां सङ्कलनमर्थान्वेषणञ्च<br>२.५ गद्यांशस्य मौनपठनेन तद्गतविषयप्रकाशनम्<br>२.६ पाठ्यांशमधीत्य प्रमुखविषयाणां यथाक्रममुपस्थापनम्<br>२.७ गद्यांशमधीत्य तस्य सारसन्देशकथनम् |
| ३. संवादस्य साभिनयं पठनम् | ३.१ संरचनागततत्त्वावबोधने संवादस्य पठनम्<br>३.२ सहपाठिभिः सह संवादस्य साभिनयं पठनम्<br>३.३. निर्धारितसंवादमधीत्य तद्गतविषयप्रकाशनम् |
| ४. निर्धारितविषयवस्तूनामध्ययनेन प्रश्नोत्तरणम् | ४.१ विषयवस्तून्यधीत्य तत्सम्बद्धप्रश्ननिर्माणम्<br>४.२ पठितस्य पाठस्य विषयवस्तूनां प्रकटनम्<br>४.३ निर्दिष्टविषयवस्तूनामध्ययनेन तत्सम्बद्धप्रश्नानामुत्तरणम्<br>४.४ पाठमधीत्य सारगर्भितवाक्यानां भावविस्तरणम् |
| ५. पाठेतरसामग्रीरधीत्य विषयवर्णनम् | ५.१ पाठातिरिक्तानां निर्दिष्टसामग्रीणां पठनेन विषयप्रकाशनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयेऽभिव्यक्तिप्रकटनम्<br>५.३ पठितविषये स्वाभिमतप्रकटनम् |
| ६. भाषातत्त्वान्यनुशील्य पाठस्य पठनम् | ६.१ वर्णानां स्थानप्रयत्नभेदानां स्पर्शादिसंज्ञानाञ्च पठनम्<br>६.२ सोदाहरणं पाठानुप्रयुक्तसन्धिनियमानां पठनम् |

| | |
|---|---|
| | ६.३ निर्धारितानां शब्दानां धातूनाञ्च रूपावलिपठनम्<br>६.४ वाक्यानि पठित्वा तेषां वाच्यनिर्धारणम्<br>६.५ पाठप्रयुक्तवाक्यानां कालस्य विध्याद्यर्थस्य निश्चयनम्<br>६.६ पाठप्रयुक्तानामव्ययपदानामर्थनिर्धारणेन तन्निर्मितवाक्यानां पठनम्<br>६.७ पाठमधीत्य निर्दिष्टैः कृत्तद्धितप्रत्ययैर्निष्पन्नानां पदानां प्रकृतिप्रत्ययविभाजनम्<br>६.८ विग्रहवाक्यपठनेन पाठप्रयुक्तानां समस्तपदानामर्थनिर्धारणम् |
| ७. पाठगतानुषङ्गिकविषयाणामनुशीलनम् | ७.१ नेतृधर्म-मानवधर्मौदार्यसम्बद्धनिर्धारितसामग्रीः पठित्वा तासामनुशीलनम्<br>७.२ निर्दिष्टसामग्रीरधीत्य परोपकारस्य दानस्य गुरोर्गुरुकुलस्य दीक्षाया उपवासस्य पशुपक्षिपूजनस्य योगासनस्य प्राणायामस्य महत्त्वकथनम्<br>७.३ निर्धारितसामग्रीणां पठनेन सङ्ख्यावाचकशब्दैर्व्यवहरणम्<br>७.४ निर्दिष्टसंस्कृतिपर्वसम्बद्धसामग्रीणां पठनेन तेषां परिचायनम्<br>७.५ निर्धारितसामग्रीणामध्ययनेन विशिष्टमहिमयुतानां स्थलानां चरितानाञ्च वैशिष्ट्यप्रतिपादनम्<br>७.६ पञ्चामृतपञ्चगव्ययोः परिचायकसामग्र्याः पठनेन गव्यानामौषधत्वप्रतिपादनम्<br>७.७ निर्दिष्टसामग्र्यध्ययनेन विद्यार्थिलक्षणस्य नागरिककर्तव्यस्य चानुशीलनम्<br>७.८ ज्योतिष-वास्तु-पुष्पकविमान-घटिकायन्त्र-सञ्जीवनी-गुरुत्वसिद्धान्तसम्बद्धसामग्रीः पठित्वा पौरस्त्यविज्ञानस्य परिचायनम्<br>७.९ प्रदत्तसामग्र्याधारेण विविधभाषाणां जननीत्वेन संस्कृतस्य महत्त्वप्रतिपादनम्<br>७.१० शक्तिमहिमप्रतिपादकसामग्र्या अध्ययनेन दुर्गा-लक्ष्मी-सरस्वतीनां शक्ति-धन-विद्याधिकारित्वनिरूपणम्<br>७.११ पठिताधारेण किरोहस्तरेखाविज्ञानस्य ज्योतिषकुण्डलीविज्ञानेन तोलनम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|

| | |
|---|---|
| १. पदवाक्यानुच्छेदानां शुद्धतया लेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पदानां वाक्यानाञ्च शुद्धतयानुलेखनम्<br>१.३ अशुद्धिनिराकरणेन पदानां वाक्यानाञ्च लेखनम्<br>१.४ पठितपदवाक्यानुच्छेदानां शुद्धलेखनम् |
| २. यथार्थं पठितपदानां वाक्येषु योजनम् | २.१ पठितपदानां पाठानुकूल्येनार्थापनम्<br>२.२ पठितपदानां पर्यायान्वेषणं प्रयोगश्च<br>२.३ अनेकार्थकपदानां प्रयोगप्रदर्शनम्<br>२.४ विलोमपदं प्रतिष्ठाप्य विपरीतार्थे वाक्यपरिवर्तनम्<br>२.५ पठितपदानां योजनेन वाक्यनिर्माणम् |
| ३. प्रदत्तानुच्छेदतः प्रश्नोत्तरणम् | ३.१ सरलानुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदान्निर्मितानां प्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सारसङ्क्षेपलेखनम्<br>३.४ निर्दिष्टानुच्छेदतः प्रमुखविषयाणां सूत्रीकरणम् |
| ४. पठितविषयतः प्रश्नविधानमुत्तरलेखनञ्च | ४.१ पठितविषयवस्तुन आधारेण प्रश्नोपस्थापनम्<br>४.२ प्रश्नार्थकपदैर्वाक्यस्थपदं प्रतिष्ठाप्य प्रश्ननिर्माणम्<br>४.३ प्रश्नप्रकृतिमभिज्ञाय तदनुकूलोत्तरप्रदानम्<br>४.४ पाठसम्बद्धप्रश्नानामुत्तरलेखनम् |
| ५. गद्यपद्ययोरुपनिबद्धस्य पाठ्यांशस्य विषयप्रकाशनम् | ५.१ पठितगद्यांशानां सार-सन्देशलेखनम्<br>५.२ पठितानां पद्यानां गीतानाञ्च सान्वयं भावार्थप्रकाशनम्<br>५.३ पाठगतसुभाषितानां भावस्य विशदीकरणम्<br>५.४ पाठगतचरितानां चारित्रिकवैशिष्ट्यप्रकाशनम्<br>५.५ सतर्कं पठितविषयवर्णनम्<br>५.६ पाठस्थविशिष्टवाक्यानां सप्रसङ्गं व्याख्यानम् |
| ६. निर्दिष्टविषयेषु सर्जनात्मकलेखनम् | ६.१ परिचितविषयाणां लिखितवर्णनम्<br>६.२ निर्दिष्टं विषयं परिवेशं चाधृत्य कथालेखनम्<br>६.३ पद्यस्य संवादस्य च स्वकीयैः शब्दैर्गद्ये लेखनम्<br>६.४ तथ्याङ्कान्वेषणेन विशिष्टव्यक्तेर्जीवनवृत्तलेखनम्<br>६.५ निर्दिष्टविषये व्यावहारिकपत्रलेखनम् |

| | |
|---|---|
| | ६.६ स्वानुभूतिं प्रकटय्य यात्रावर्णनम्<br>६.७ निर्दिष्टविषये संवादलेखनम्<br>६.८ पठितमनुभूतञ्च विषयमवलम्ब्यानुच्छेदप्रबन्धरचना |
| ७. आनुषङ्गिकविषयाणामनुशीलनेन मौलिकलेखनम् | ७.१ नेतृधर्म-मानवधर्मौदार्यविषये निर्दिष्टलेखनम्<br>७.२ परोपकारस्य दानस्य गुरोर्गुरुकुलस्य दीक्षाया उपवासस्य पशुपक्षिपूजनस्य योगासनस्य प्राणायामस्य महत्त्वप्रकाशनम्<br>७.३ सङ्ख्यावाचकशब्दानां वाक्येषु प्रयोगः<br>७.४ निर्दिष्टसंस्कृतिपर्वणां परिचायनं महत्त्वलेखनञ्च<br>७.५ निर्दिष्टानां विशिष्टमहिमयुतानां स्थलानां चरितानाञ्च वैशिष्ट्यनिरूपणम्<br>७.६ पञ्चामृतपञ्चगव्ययोः परिचायनेन गव्यानामौषधत्वप्रतिपादनम्<br>७.७ विद्यार्थिनां नागरिकस्य च लक्षणस्य कर्तव्यस्य च वर्णनम्<br>७.८ ज्योतिष-वास्तु-पुष्पकविमान-घटिकायन्त्र-सञ्जीवनी-गुरुत्वसिद्धान्ताधारेण पौरस्त्यवाङ्मयस्य वैज्ञानिकपक्षोद्घाटनम्<br>७.९ विविधभाषाणां जननीत्वेन संस्कृतस्य महत्त्वप्रकाशनम्<br>७.१० दुर्गा-लक्ष्मी-सरस्वतीनां शक्ति-धन-विद्याधिकारित्वाख्यापनम्<br>७.११ किरोहस्तरेखाविज्ञानस्य ज्योतिषकुण्डलीविज्ञानेन सह सम्बन्धान्वेषणम्<br>७.१२ कुलगुरोः परिचायनेनाचार्याध्यापकयोः पार्थक्यप्रदर्शनम् |
| ८. अनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषयाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तस्य पठितानुच्छेदस्य नेपालिभाषायामनुवादः<br>८.४ नेपालिभाषायाः सरलवाक्यैर्निर्मितस्यानुच्छेदस्य संस्कृतेऽनुवादः |
| ९. पाठानुप्रयुक्तानां भाषातत्त्वानां प्रयोगः | ९.१ वर्णानां स्पर्शादिसंज्ञाबोधपुरःसरं स्थानप्रयत्ननिर्धारणम्<br>९.२ प्रमुखसन्धिनियमानाधृत्य सन्धिविधानं सन्धिविच्छेदनञ्च<br>९.३ निर्धारितानां शब्दानां धातूनाञ्च रूपावलिप्रयोगः<br>९.४ पाठप्रयुक्तानामव्ययपदानां वाक्येषु योजनम्<br>९.५ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययविच्छेदनं वाक्येषु प्रयोगश्च<br>९.६ पठिताधारेण प्रदत्तवाक्यानां वाच्यपरिवर्तनम् |

| | |
|---|---|
| | ९.७ पाठे प्रयुक्तानां समस्तपदानां विग्रहप्रदर्शनं वाक्ये प्रयोगश्च ।<br>९.८ कालस्य विध्याद्यर्थस्य चाधारेण निर्दिष्टवाक्यानां परिवर्तनम् |

## ४. विषयक्षेत्रं क्रमश्च

**कक्षा** ११

| **क्र.सं** | **विधा** | **विषयक्षेत्रम्** | **आनुषङ्गिक-विषयविस्तारः** | **योग्यताविस्तारः** | **अनुप्रयुक्तव्याकरणम्** | **कार्यघण्टा** | **पूर्णाङ्काः** |
|---|---|---|---|---|---|---|---|
| १ | कविता | सांस्कृतिकी | प्रकृतिमहिमा | लयबोधः, प्रकृतिपूजायाः परम्परा, गोवर्धनपर्वतस्य पूजा-प्रसङ्गः, तुलसीपिप्पलादीनां वैज्ञानिकं महत्त्वम् | वर्णस्थानप्रयत्नौ | १० | ६ |
| २ | नाट्यांशः | चारित्रिकः | अभिज्ञानशाकुन्तलस्यांशः | लघुत्रय्या बृहत्त्रय्याः प्रस्थानत्रय्याश्च परिचयः, कविपरिचयः, संस्कृतनाट्यपरम्परा, नाट्यभेदः | आत्मनेपदिनां धातूनां भविष्यत्कालप्रयोगः, | १० | ६ |
| ३ | प्रबन्धः | स्वास्थ्यसम्बद्धः | आयुर्वेदपरिचयः | औषधवनस्पतीनां परिचयः, स्वस्थतायै नेपालिव्यञ्जनपाके प्रयुज्यमानानां हरिद्रार्द्रकजीरकादीनां महत्त्वम् (मसला), महादेवेन अश्विनीकुमाराभ्याञ्च शल्यक्रिया | प्रेरणार्थकप्रयोगः | १३ | ९ |
| ४ | कथा | वैचारिकी | गौतमबुद्धस्य विचार-प्रधाना घटना | त्रिपिटकजातककथयोः परिचयः, प्राकृतभाषास्वमन्यभाषासु च संस्कृतस्य प्रभावः, जैनबौद्धदर्शनयोर्बोधार्थं संस्कृतस्य ज्ञानापेक्षा, अवधीसंस्कृतिः, बौद्धतन्त्रस्य परम्परा | शतृशानच्प्रत्ययप्रयोगः, | १३ | ९ |
| ५ | मन्त्राः | वैदिकाः (स्वस्तिवाचनसम्बद्धाः) | ब्रह्माण्डस्य मङ्गलकामना (विधर्मीको पनि कल्याणको कामना गर्ने परम्परालाई राख्नुपर्ने) | शिक्षायां सर्ववर्णानाम् अधिकारस्येतिहासः - सन्तरविदासस्य स्वामिप्रपन्नाचार्यस्य च प्रसङ्गः, विश्वामित्रस्य ब्रह्मर्षित्वम् | तरप्तमप्प्रत्ययप्रयोगः, | १५ | ९ |
| ६ | कविता | प्रेमविषयसम्बद्धा | भागवतस्य उद्धवगोपीसंवादस्य | श्रीमद्भागवतपुराणस्य परिचयः, महाभारतस्य बृहद्ग्रन्थत्वप्रतिपादनम्, | ण्वुल्प्रत्ययप्रयोगः, टाप्प्रत्ययप्रयोगः | १० | ६ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | प्रसङ्गः | शृङ्गारपद्यम्, कालिदासस्य गेटेप्रशंसितं पद्यम् | | | |
| ७ | संवादः | नारीसम्मानविषयकः | कुमारीपूजा | सृष्टिसञ्चालिकारूपेण नारीणां चित्रणम्, नारीसम्मानविषयको मनुस्मृतिश्लोकः, गार्गीमैत्रेयीकात्यायनीनां प्रसङ्गः, नेवारसंस्कृतिः, विजयादशमी, गुभाजुतन्त्रपरम्परा | ण्यत्-ङीप्प्रत्ययप्रयोगः | १० | ६ |
| ८ | प्रबन्धः | सभ्यताविषयकः | नेपाले सभ्यताया विकासः, कोशीगण्डकीकर्णाली-सभ्यता | आर्षसभ्यतायाः विज्ञानसम्मतया सभ्यतया सह तुलना, विकासवादस्य दशावताराणाञ्च प्रसङ्गः | तत्पुरुषसमासः | १० | ६ |
| ९ | कथा | आदर्शप्रधाना | कौत्सवरतन्तुरघु-प्रसङ्गः | चतुर्विधपुरुषार्थपरिचयः, गुरुदक्षिणायाः परम्परा, राजनीतिः, रामराज्यम् | नान्तपुँल्लिङ्गशब्द-प्रयोगः | १० | ६ |
| १० | पत्रम् | व्यावहारिकम् | श्रद्धाञ्जलिः, समवेदना च | सनातनपरम्परायां मृत्युसंस्कारस्य भेदाः, दाहसंस्कारस्य वैज्ञानिकमहत्त्वम्, पञ्चमहाभूतेषु स्थूलशरीरस्य लयः, कर्मसु भोजनसमये च श्वेतवस्त्रधारणस्य च महत्त्वम् | नान्तनपुंसकलिङ्ग-शब्दप्रयोगः | १० | ६ |
| ११ | गानम् | सांस्कृतिकम् | संस्कृतभजनम् | नेपाले प्रचलितानां ख्यालीचुट्कादिभजनानां परिचयः, विवाहेषु श्लोक(सिलोक)संस्कृतिः, नैपालकवाद्यानां परिचयः | अव्ययीभावसमासः | १० | ६ |
| सैद्धान्तिकाभ्यासः | | | | | | १२० | ७५ |
| प्रयोगाभ्यासः | | | | | | ४० | २५ |
| योगः | | | | | | १६० | १०० |

कक्षा १२

| क.सं | विधा | क्षेत्रम् | आनुषङ्गिक-विषयविस्तारः | योग्यताविस्तारः | अनुप्रयुक्तव्याकरणम् | कार्यघण्टा | पूर्णाङ्काः |
|---|---|---|---|---|---|---|---|
| १ | कविता | आचारसम्बद्धा | गुरुमहिमा | गुरुपरम्परा, गुरोः शास्त्रीयमहत्त्वम्, दीक्षाया महत्त्वम्, गुरुकुलपरम्परा, कुलगुरुपरिचयः, आचार्याध्यापकयोर्भेदः | वर्णप्राणत्वघोषत्वे | १० | ६ |
| २ | संवादः | सांस्कृतिकः | जितियापर्व | थारुसंस्कृतिः, माघीपर्वणि रामसम्बद्धलीलानृत्य-प्रदर्शनम्, यादवसंस्कृतिः | आत्मनेपदिधातूनां भूतकालप्रयोगः | १० | ६ |
| ३ | प्रबन्धः | स्वास्थ्यसम्बद्धः | योगः | कोभिडप्रसङ्गः, स्वस्थशरीराय उपवासः, प्राणायामप्रकारः, योगासनपरिचयः, गव्यानामौषधत्वम्, पञ्चामृतपञ्चगव्ययोः परिचयः | तृच्त्रल्प्रत्ययशब्दप्रयोगः | १३ | ९ |
| ४ | कथा | सांस्कृतिकी | गौरापर्व | पशुपक्षिणां पूजनम्, मैथिलसंस्कृतिः, विद्यापतिपरिचयः, नेपालस्य विभिन्नमन्दिरेषु विविधजातीनां पौरोहित्यम् | द्वन्द्वसमासः द्विगुसमासश्च | १० | ६ |
| ५ | कविता | नैतिकी | नीतिपद्यानि | नागरिककर्तव्यम्, विद्यार्थिलक्षणम्, उदारजीवनम् (शुक्राचार्येण देवगुरुपुत्रस्य शिष्यत्वेन स्वीकरणम्), नेतृधर्मः, मानवधर्मः | सान्तनपुंसकलिङ्गशब्द-प्रयोगः | १० | ६ |
| ६ | जीवनी | वैज्ञानिकी | वैज्ञानिकभारद्वाजः | पूर्वीयग्रन्थेषु गुरुत्वचर्चा, पुष्पकविमानपरिचयः, घटिकायन्त्रपरिचयः, सञ्जीवनीप्रसङ्गः | त्वतल्प्रत्ययप्रयोगः | १० | ६ |
| ७ | यात्रावर्णनम् | प्राकृतिकम् | दोलखाभीमसेन-कालिञ्चोकदेवीदर्शनम् | नेपालस्य चतुर्णां धार्मिकक्षेत्राणां पौराणिकं महत्त्वम्, पिण्डेश्वरनामकरणम्, ह्लोसारपर्व | वर्तमानकाले कर्मवाच्यप्रयोगः | १३ | ९ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ८ | प्रबन्धः | गणितविषयकः | वैदिकगणितम् | एकतः खर्बान्तानां सङ्ख्याशब्दाः, ज्योतिषभेदौ, सूर्यपृथिव्योः दूरत्वविषये वेदप्रमाणम्, किरोनामकस्य पाश्चात्यविदुषः हस्तरेखाविज्ञानेन सह पूर्वीयकुण्डलीविज्ञानस्य तुलना | कर्मधारयसमासः, भविष्यत्काले कर्मवाच्यप्रयोगः | १४ | ९ |
| ९ | कथा | ऐतिहासिकी | महीन्द्रमल्लस्य कथा | शङ्खधरशाख्वापरिचयः, नेपालसंवतः स्थापना, संस्कृतादन्यभाषाणामुत्पत्तिः, सामान्यवास्तुविचारः | इनिणिनिप्रत्ययप्रयोगः | १० | ६ |
| १० | पत्रम् | व्यावहारिकम् | प्रशंसापत्रम् | परोपकारमहत्त्वम्, दानमहत्त्वम्, बलिकर्णयोः प्रसङ्गः (कर्णस्य सूतोद्धारप्रसङ्गः), व्यासवचनम्, भुर्जपत्र-ताडपत्रपरिचयः | बहुव्रीहिसमासः, भूतकाले कर्मवाच्यप्रयोगः | १० | ६ |
| ११ | गीतम् | गानम् | मातृमहत्त्वम् | दुर्गालक्ष्मीसरस्वतीनां शक्तिविद्याधनाधिकारित्वम्, देव्यपराधक्षमापनस्तोत्रस्य पद्यद्वयम्, आद्यशङ्कराचार्यपरिचयः, सामवेदस्य सङ्गीतजनकत्वम् | मतुप्-ठक्प्रत्ययप्रयोगः | १० | ६ |
| सैद्धान्तिकाभ्यासः | | | | | | १२० | ७५ |
| प्रयोगाभ्यासः | | | | | | ४० | २५ |
| योगः | | | | | | १६० | १०० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| कक्षा ११ | | कक्षा १२ | |
|---|---|---|---|
| विषयक्षेत्राणि | शिक्षणघण्टा | विषयक्षेत्राणि | शिक्षणघण्टा |
| सामाजिकोत्सवेषु ऐतिहासिकसंस्कृतग्रन्थानां पद्यानां गतियतिलयसंयोजनेन गायनम् | १० | प्रसिद्धानां संस्कृतग्रन्थकाराणां जन्मजयन्त्याद्यवसरेषु तद् ग्रन्थांशानां भावानुकुल्येन वाचनम् | १० |
| प्राचीनार्वाचीनानां विशिष्टजनानां वस्तूनां वा विषये अन्विष्य तद्विषयिणी प्रस्तुतिः | १० | दैनिकव्यवहारे प्रयुक्तानां संस्कृतशब्दानां लिङ्गाधारेण विभजनपूर्वकं तालिकानिर्माणम् | १० |
| पुस्तकालये गत्वा अध्ययनेन तत्राधीतानां विषयवस्तूनां स्वशैल्या प्रस्तवनम् | १० | संस्कृतभाषायामुद्घोषणसमाचार-वाचनादिकार्यसम्पादनम् | १० |
| अन्तर्जाले संस्कृतपत्रिकासु च प्रकाशितानि विषयवस्तूनि अन्विष्य प्रस्तुतिः | १० | संस्कृतसामग्रीभ्यः कर्तृकर्मभाववाच्यप्रयुक्तानि वाक्यानि अन्विष्य सपरिचयं प्रस्तुतिः | १० |
| योगः | ४० | योगः | ४० |

## ६. शिक्षणसञ्चालनप्रक्रिया

शिक्षकैः छात्राणां भाषिकक्षमतायाः प्रवर्धनाय शिक्षणसामग्र्याधारिताः तत्सम्बद्धास्तदतिरिक्ताश्च कार्यक्रमाः संयोजनीयाः । यतो हि छात्राणां वैयक्तिकक्षमताभिवर्धनाय भाषिकशिल्पविकासपरः कार्यकलापोऽपेक्षितो भवति । छात्रेभ्यो नवीनज्ञानाभिमुखस्य शिक्षणस्य अवसरप्रदानेन शिक्षकैः पृष्ठपोषणञ्च कार्यम् । शब्दभाण्डागारस्य ज्ञानस्याभिवृद्धये अधिकाधिकसन्दर्भसामग्रीणाम् अध्ययनाय छात्राः प्रेरणीयाः । तदर्थं छात्रकेन्द्रितो शिक्षणविधिश्च अपेक्षितः ।

पाठशिक्षणक्रमे पाठयिष्यमाणेन पाठेन सम्बद्धानां विषयवस्तूनां सामान्यतः सङ्केतं कृत्वा तद्विषयेऽनुभवपूर्वज्ञानादिप्रस्तुतये छात्राः प्रेरणीयाः । तत्र कक्षायां पाठसम्बद्धानां कथासन्दर्भगतानां वा विषयाणां श्रावणेन छात्रमनःसु पाठविषयिणी जिज्ञासा समुत्पादनीया । अनुभवश्रावण-प्रश्नोत्तर-विमर्शादिमाध्यमेन छात्रेषु रुचिं समुत्पाद्यैव पाठारम्भः करणीयः ।

यथा शिक्षणं प्रभावकारि स्यात्तथा कक्षा व्यवस्थापनीया । कक्षायां शिक्षणसामग्रीणां व्यवस्थापनेन कक्षायाः सज्जता सम्पादनीया । पाठ्यवस्तुभिः सम्बद्धानां सामग्रीणां भित्तौ श्लेषणम्, वस्तुधान्यां स्थापनम्, सूचनपट्टादिषु योजनञ्च कर्तव्यम् । गणितीयतथ्यानाम्, प्रयोगात्मकविषयाणां सामग्रीणाम्, भाषाविषयाणां शब्दादिसूचीनाञ्च व्यवस्थापनेन कक्षा सज्जीकरणीया । एतेन कक्षाव्यवस्थापनेन कक्षाया अवस्थितिः शिक्षणानुकूला भवति ।

कक्षाशिक्षणे शिक्षक एकाकिभाषणात्मकं विधिं नावलम्बयेत् । तत्र सामूहिककार्यकलापमाध्यमेन छात्राणां शिक्षणं प्रभावकारि भवति । शिक्षकः केवलं स्वाभ्यस्तविषयाणां प्रकाशको न भूत्वा छात्राणामन्तर्निहितज्ञानस्य च समुद्बोधको भवेत् । छात्रपक्षत एव पाठ्यवस्तुपरिचर्यायै पर्याप्तावसरस्य कक्षापर्यावरणं निर्मेयम् । एतेन शिक्षणस्य सहजीकरणं भवति ।

शिक्षणसामग्रीणां प्रयोगः शिक्षणकाले वैविध्येन भवति । तत्र सम्मार्जनी-श्वेतफलक-वर्णलेखन्यादीनां दैनिकरूपेण प्रयोगार्हवस्तूनां प्रयोगमन्तरापि अन्याश्च विषयसम्बद्धाः पाठसन्दर्भगताः सामग्र्यश्च भवन्ति । तेषां यथाशक्यमाधिक्येन प्रयोगः छात्रेभ्यो विषयबोधार्थं सम्यक् उपकारी सेत्स्यति ।

छात्राणां ग्रहणक्षमतायाः स्तरस्य चाधारेण शिक्षणविधेरुपयोगः शिक्षकैः करणीयः । छात्रेषु अपेक्षितं कौशलम्, ज्ञानम्, पाठ्यक्रमोचितं कार्यान्वयनं कर्तुञ्च शिक्षकाः शिक्षणसहजीकरणस्य अग्रे निर्दिष्टाः प्रक्रिया आलम्बितुं शक्नुवन्ति ।

**(क) प्रयोगविधिः**

सम्प्रेषणात्मकविधिना भाषायाः अभ्यासोऽपि शिक्षणसहजीकरणस्यैव एका प्रक्रिया अस्ति । एतदर्थं विविधेषु सन्दर्भेषु प्रयोज्यानां संवादादीनामभ्यासोऽपेक्ष्यते । विविधं परिवेशम्, सन्दर्भञ्च उद्भाव्य तदनुकूलो भाषिककार्यकलापः समायोजनीयो भवति । एतादृशे भाषिककार्यकलापे शिक्षकस्य सहावस्थित्या सह साहाय्यञ्च छात्रेभ्योऽपेक्षितं भवति । सन्दर्भेऽस्मिन् शिक्षकेण छात्रेभ्यः प्रयोज्यानां परिस्थित्यनुसारेण नैकनवीनशब्दानां बोधार्थमवसरः प्रदेयः ।

तथैव शिक्षकाः छात्राणां भाषिकशिल्पविकासाय पाठान्तर्गतानां तदतिरिक्तनाञ्च भाषाप्रयोगोदाहरणानामभ्यासं कक्षायां कारयेयुः । व्याकरणनियमावलम्बिनं भाषाप्रयोगमाधृत्य प्रस्तुतिः, सामूहिकाभ्यासः, आकृतिनिर्माणम्, लेखनाभ्यासः, अनुच्छेदादिरचना, पाठ्यवाचनञ्चेत्यादीनां विधीनां प्रयोगेण छात्राणां भाषाप्रयोगक्षमता वृद्धिं यास्यति ।

**(ख) प्रदर्शनविधिः**

छात्राणां भाषिकस्तराभिवृद्धये प्रदर्शनात्मको विधिरत्यन्तं प्रभावकारि भवति । तत्र छात्रान् चित्राणि यथासम्भवं श्रव्यदृश्यसामग्रीश्च प्रदर्श्य शिक्षणं कर्तव्यम् । सामग्रीणां प्रदर्शनानन्तरं प्रदर्शितसामग्रीमाधृत्य वार्तालापेन ज्ञानं सुदृढं सम्पद्यते । सामग्रीणां प्रदर्शनानन्तरं प्रश्नोत्तरकार्यकलापश्च अपेक्षितो भवति ।

**(ग) प्रश्नोत्तरविधिः**

विषयवस्तुबोधार्थं छात्राणां मध्ये प्रश्नोत्तरात्मकः कार्यकलापः सञ्चालनीयः । तत्र केचन पाठ्यविषयमाधृत्य प्रश्नान् उपस्थापयन्ति, केचन छात्राश्च उत्तरं यच्छन्ति । एतादृशे कार्यकलापे श्रवणभाषणशिल्पयोरुपयोगो भवति । कार्यकलापेऽस्मिन् पाठगतान् सन्दर्भान्, कथांशान्, पद्यांशान्, विषयवस्तु च उद्भाव्य प्रश्नोत्तरक्रिया प्रचाल्यते । एतेन पाठ्यवस्तुनः शिक्षणे सहजीकरणं भवति ।

**(घ) अभिनयविधिः**

भाषिकक्षमतावर्धनाय पाठगतानां संवादानां पात्रत्वं छात्रेषु परिकल्प्य अभिनयं कारयितुं शक्यते । संवादाभिनयेन छात्राणां परस्परं स्वतन्त्रतया संवादेन वा शिक्षणं सहजं करणीयम् । नाटकीयशैल्या संवादविधानेन छात्राः साभिनयं संलपितुं प्रभवन्ति । छात्राणां सामूहिकप्रस्तुत्यनन्तरं शिक्षकात् प्राप्ता मूल्याङ्कनप्रतिक्रिया च छात्राणां भाषाप्रयोगात्मकं कौशलं परिपोषयति ।

**(ङ) विमर्शविधिः**

पाठ्यवस्तु आधृत्य कक्षायां छात्रशिक्षकाणां मध्ये सामूहिको विमर्शो व्यवस्थापनीयः । भाषिककार्यकलापे स्वपठनम्, युगलपठनम्, समूहपठनञ्च कारयित्वा

उच्चारणाद्यभ्यासविषये च सामूहिकरूपेण विमर्शनीयम् । सन्दर्भेऽस्मिन् छात्रशिक्षकाणां मिथः संवादः, कथावाचनम्, घटनावर्णनम्, कथासन्देशकथनम्, दैनिकीवर्णनमित्यादिः कार्यकलापः भवितुं शक्नोति ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलपान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मिका निर्णयात्मिका च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृति-कार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यावलम्बन-पर्यावरणसंरक्षण-भाषिकशिल्पार्जनप्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्यङ्कानां कृते आन्तरं परीक्षणम्, प्रतिशतं पञ्चसप्तत्यङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य

शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । संस्कृतभाषायाः व्याकरणस्य च शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाध्यापकेन विधागतलेखनाय सिर्जनात्मकलेखनाय च प्रेरणम्, सूत्रोच्चारणाय सूत्रार्थापनाय च प्रेरणम्, सूत्रार्थावबोधनम्, उदाहरणेषु सूत्रप्रवर्तननिदर्शनम्, उदाहरणेषु प्रत्युदाहरणेषु च पार्थक्यबोधनाय प्रश्नोत्तराणि, सामूहिकी चर्चा, समूहविभाजनं कृत्वा समस्यायाः समाधानम्, नवीनोदाहरणचयनाभ्यासः, रूपावलिसञ्चालनाय कथनम्, रूपसिद्धिप्रक्रियालेखनाय प्रेरणम्, समासे लौकिकालौकिकविग्रहप्रदर्शनाय कथनम्, तिङन्ते समानप्रकृतिकानां धातूनां रूपावलिसञ्चालनाय प्रेरणादिकं कार्यम् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

## विशिष्टीकरणतालिका

**कक्षा : ११** **पूर्णाङ्काः ७५**

**समयः घण्टात्रयम्**

| **क्र. स.** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **प्रश्नप्रकृतिः** | **ज्ञानम्** | | | **बोधः** | | | **शिल्पम्** | | | **उच्चदक्षता** | | | **प्रष्टव्याः प्रश्न सङ्ख्याः** | **अङ्क भारः** | **स्पष्टीकरणम्** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | | | |
| १. | गद्यम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मिका | ३ | - | - | ३ | - | - | - | १५ | - | - | - | १६ | ११ | ३७ | **ज्ञानबोध**क्षेत्रतः-<br>पठितगद्यांशाद् एकपदेन उत्तरलेखनार्थं द्वौ प्रश्नौ । (१ अङ्कः)<br>एकवाक्येन उत्तरलेखनार्थञ्च द्वौ प्रश्नौ । (२ अङ्कौ)<br>अपठितगद्यांशाद् एकपदेन उत्तरलेखनार्थं द्वौ प्रश्नौ । (१ अङ्कः)<br>एकवाक्येन उत्तरलेखनार्थञ्च द्वौ प्रश्नौ । (२ अङ्कौ)<br>**शिल्प**क्षेत्रतः-<br>पत्ररचनासम्बद्ध एकः प्रश्नः (रिक्तस्थानपूर्तिः) । (५ अङ्काः)<br>संवादरचनासम्बद्धः (संलापपूर्तिः)<br>कथारचनासम्बद्धो वा एकः प्रश्नः (घटनासंयोजनम्) । (५ अङ्काः)<br>दैनिकीसम्बद्धो जीवनवृत्तसम्बद्धो वा एकः प्रश्नः (क्रमयोजनम्) । (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>अनुच्छेदरचनासम्बद्ध एकः प्रश्नः । (८ अङ्काः)<br>चित्रवर्णनसम्बद्ध एकः प्रश्नः । (८ अङ्काः) |
| २. | पद्यम् | प्रयोगोच्चदक्षतात्मिका | - | - | - | - | - | - | - | १० | - | - | - | ८ | ३ | १८ | **शिल्प**क्षेत्रतः-<br>अन्वयलेखनसम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>मन्त्रगानयोः सरलार्थलेखनसम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>भावार्थलेखनसम्बद्ध एकः प्रश्नः । (४ अङ्काः)<br>पद्याधारेण विषयवर्णनसम्बद्ध एकः प्रश्नः । (४ अङ्काः) |
| ३. | अनुप्रयुक्त-व्याकरणम् | ज्ञान-बोध-प्रयोगात्मिका | २ | - | - | ३ | - | - | - | १५ | - | - | - | - | ८ | २० | **ज्ञानबोध**क्षेत्रतः-<br>वर्णोच्चारणस्थानसम्बद्ध एकः प्रश्नः । (१ अङ्कः)<br>प्रयत्नसम्बद्ध एकः प्रश्नः । (१ अङ्कः)<br>लिङ्गकालपदवर्गनिर्धारणसम्बद्ध एकः प्रश्नः । (३ अङ्काः)<br>**शिल्प**क्षेत्रतः-<br>निर्धारितप्रत्यययोजनेन सन्धियोगेन वियोगन वा, समासेन विग्रहेण वा शब्दरचनासम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>लकाररूपावलीप्रयोगसम्बद्धः कारकविभक्तिनिर्धारणसम्बद्धश्च एकः प्रश्नः । (५ अङ्काः)<br>कर्तृकर्मक्रियापदैर्वाक्यपूर्तिसम्बद्ध एकः प्रश्नः । (५ अङ्काः) |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

# विशिष्टीकरणतालिका

**कक्षा : १२** | **पूर्णाङ्काः ७५**

**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नप्रकृतिः | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्चदक्षता | | | प्रष्टव्याः प्रश्न सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | गद्यम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मिका | ३ | - | - | ३ | - | - | - | १५ | - | - | - | १६ | ११ | ३७ | **ज्ञानबोध**क्षेत्रतः-<br>पठितगद्यांशाद् एकपदेन उत्तरलेखनार्थं द्वौ प्रश्नौ । (१ अङ्कः)<br>एकवाक्येन उत्तरलेखनार्थञ्च द्वौ प्रश्नौ । (२ अङ्कौ)<br>अपठितगद्यांशाद् एकपदेन उत्तरलेखनार्थं द्वौ प्रश्नौ । (१ अङ्कः)<br>एकवाक्येन उत्तरलेखनार्थञ्च द्वौ प्रश्नौ । (२ अङ्कौ)<br>**शिल्प**क्षेत्रतः-<br>पत्ररचनासम्बद्ध एकः प्रश्नः (रिक्तस्थानपूर्तिः) । (५ अङ्काः)<br>संवादरचनासम्बद्धो (संलापपूर्तिः) जीवनवृत्तसम्बद्ध (क्रमयोजनम्) एकः प्रश्नः । (५ अङ्काः)<br>कथारचनासम्बद्ध एकः प्रश्नः (घटनासंयोजनम्) । (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>अनुच्छेदरचनासम्बद्ध एकः प्रश्नः । (८ अङ्काः)<br>चित्रवर्णनसम्बद्ध एकः प्रश्नः । (८ अङ्काः) |
| २. | पद्यम् | प्रयोगोच्चदक्षतात्मिका | - | - | - | - | - | - | - | १० | - | - | - | ८ | ३ | १८ | **शिल्प**क्षेत्रतः-<br>अन्वयलेखनसम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>सरलार्थलेखनसम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>भावार्थलेखनसम्बद्ध एकः प्रश्नः । (४ अङ्काः)<br>पद्याधारेण विषयवर्णनसम्बद्ध एकः प्रश्नः । (४ अङ्काः) |
| ३. | अनुप्रयुक्त-व्याकरणम् | ज्ञान-बोध-प्रयोगात्मिका | २ | - | - | ३ | - | - | - | १५ | - | - | - | - | ८ | २० | **ज्ञानबोध**क्षेत्रतः-<br>वर्णोच्चारणे प्राणत्वसम्बद्ध एकः प्रश्नः । (१ अङ्कः)<br>वर्णानां प्राणत्वसम्बद्ध एकः प्रश्नः । (१ अङ्कः)<br>लिङ्गकालपदवर्गनिर्धारणसम्बद्ध एकः प्रश्नः । (३ अङ्काः)<br>**शिल्प**क्षेत्रतः-<br>निर्धारितप्रत्यययोजनेन समासेन विग्रहेण वा शब्दरचनासम्बद्ध एकः प्रश्नः । (५ अङ्काः)<br>लकाररूपावलीप्रयोगसम्बद्धः वाच्यप्रयोगसम्बद्धश्च एकः प्रश्नः । (५ अङ्काः)<br>कर्तृकर्मक्रियापदैर्वाक्यपूर्तिसम्बद्ध एकः प्रश्नः । (५ अङ्काः) |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

# प्रश्नपत्रनिर्देशः

**कक्षा :** ११
**समयः** घण्टात्रयम्  **पूर्णाङ्काः** ७५

**१. अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नान् उत्तरयत**

**प्रथमः अनुच्छेदः**

महाकविः कालिदासः संस्कृतभाषायाः सर्वश्रेष्ठः कविः अस्ति । असौ नाटककारः, महाकाव्यनिर्माता, गीतिकाव्यकर्ता च आसीत् । तस्य त्रीणि नाटकानि - मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं च, महाकाव्यद्वयम्- कुमारसम्भवम्, रघुवंशं च, गीतिकाव्यद्वयम् - ऋतुसंहारम्, मेघदूतं च सन्ति । कालिदासः वैदर्भी-रीत्याः सर्वोत्तमः कविः आसीत् । तस्य नवनवोन्मेषशालिनी प्रतिभा सर्वतोमुखी आसीत् । कालिदासः महाराजस्य विक्रमादित्यस्य सभाकविः आसीत् । तस्य राजधानी उज्जयिनी आसीत् । मेघदूते उज्जयिन्याः भव्यं वर्णनं विद्यते । विक्रमादित्यस्य सभायां कालिदासस्य नाटकानां प्रयोगः सञ्जातः ।

**(क) एकपदेन उत्तरयत** **०.५×२=१**

(अ) महाकविः कालिदासः कस्याः भाषायाः सर्वश्रेष्ठः कविः अस्ति ?
(आ) कालिदासेन कति नाटकानि रचितानि ?

**(ख) एकवाक्येन उत्तरयत** **१×२=२**

(अ) कालिदासः कस्य सभाकविः आसीत् ?
(आ) मेघदूते कस्याः वर्णनं विद्यते ?

**(ग) निर्देशानुसारेण उत्तरयत** **१×३=३**

(अ) 'सर्वोत्तमः कविः' इत्यनयोः पदयोः विशेष्यं किम् ?
(आ) 'आसीत्' इति क्रियायाः कालः कः ?
(इ) 'असौ' इति पदे का विभक्तिः ?

**द्वितीयः अनुच्छेदः**

उमेशः आदर्शः छात्रः अस्ति । स प्रातःकाले पञ्चवादने उत्तिष्ठति । सः शौचालयं गत्वा मुखं प्रक्षालयति, दन्तधावनं च करोति । ततः स जलं पातुं भोजनालयं गच्छति । जलं पीत्वा ईश्वरं स्मरति । सार्धपञ्चवादनतः पादोनसप्तवादनपर्यन्तं पुस्तकानि पठन् गृहकार्यं करोति । ततः स भक्तं खादित्वा वस्त्राणि धारयति । स पुस्तकानि गृहीत्वा पठितुं विद्यालयं गच्छति । विद्यालये सर्वप्रथमं स प्रार्थनां कर्तुं विद्यालयस्य प्राङ्गणं गच्छति । ततः पाठं पठितुं कक्षां प्रविशति ।

**(क) एकपदेन उत्तरयत** **०.५×२=१**

(अ) उमेशः प्रातःकाले कति वादने उत्तिष्ठति ?
(आ) उमेशः जलं पीत्वा कं स्मरति ?

**(ख) एकवाक्येन उत्तरयत** **१×२=२**

(अ) कः आदर्शः छात्रः अस्ति ?
(आ) उमेशः पुस्तकानि गृहीत्वा पठितुं कुत्र गच्छति ?

**(ग) निर्देशानुसारेण उत्तरयत** **१×५=५**

(अ) 'स प्रातःकाले' इत्यत्र सन्धिविच्छेदं कुरुत ?
(आ) 'गृहकार्यम्' इति पदस्य विग्रहं प्रदर्शयत ?
(इ) 'प्राङ्गणम्' इत्यस्य सन्धिनाम लिखत ?
(ई) 'दन्तधावनम्' इति पदस्य समासनाम निर्दिशत ।

(उ) 'पठन्' इति पदस्य प्रकृति-प्रत्ययौ वियोजयत ।

**२. अधस्तनं श्रद्धाञ्जलिपत्रं मञ्जूषातः समुचितानि पदानि चित्वा पूरयत** **०.५×१०=५**

हार्दिकः श्रद्धाञ्जलिः

**स्व. बालचन्द्रः सापकोटा**

(२०१० वैशाखशुक्लद्वादशी - २०७८ फल्गुनपूर्णिमा)

आरोग्य-.............-संस्थायाः स्थापनाकालतः ........... यावत् संस्थायाः

..................अलङ्कृतवतः स्वास्थ्यसेवायाम् ............... योगदानं कृतवान् श्रीबालचन्द्र-सापकोटा

................. वैक्रमाब्दस्य चैत्रमासस्य ............. दिनाङ्के पञ्चत्वं ........... ।

तस्य ................ आत्मनः कैवल्यं कामयमानः तं प्रति भावपूर्णं ............ प्रकटयामः ।

एवञ्च शोकसन्तप्तं परिवारं प्रति ............. समवेदनाञ्च भावयामः ।

**कृष्णहरिः लम्सालः**

**अध्यक्षः**

**तथा**

**आरोग्य-स्वास्थ्य-संस्था-परिवारः**

| |
|---|
| साम्प्रतम्, स्वास्थ्य, श्रद्धाञ्जलिम्, अतुलनीयम्, सचिवपदम्, २०७८, गतः, पञ्चदशे, दिवङ्गतस्य, हार्दिकीम् |

**३. घटनासंयोजनेन कथां रचयत** **५**

नारदस्य मनसि अहं सर्वोत्तमः भक्तः इति भावना ।
हनुमान् अपि भगवतः महान् भक्तः इति श्रवणम् ।
हनुमान् सर्वोत्तमः भक्तः अहं वेति निश्चयार्थं अयोध्यां प्रति गमनम् ।
महाराजस्य श्रीरामस्य राजभवनात् बहिः एव हनुमता सह मेलनम् ।
भगवतः श्रीरामस्य भक्तानां नामावल्याः पुस्तिकायाः विषये हनुमतः सकाशात् ज्ञानम् ।
श्रीरामेण सह मिलित्वा पुस्तिकायां केषाञ्चन भक्तानां नाम्नाम् अनन्तरं नारदस्य नाम उल्लिखितं परन्तु हनुमतः नाम नासीत् ।
नारदः - हनुमन् तस्यां पुस्तिकायां तु भवतः नाम ?
हनुमान् - नारद सा तु भगवतः स्मर्तककणां नामावल्याः पुस्तिका, भगवतः श्रीरामस्य पार्श्वे अपरा च एका पुस्तिका विद्यते । तां याचित्वा पश्यतु ।
अपरस्यां पुस्तिकायां तेषां नामानि आसन्, येषां स्मरणं श्रीरामः स्वयं करोति ।
तत्र हनुमतः नाम प्रथमे अङ्के दृष्ट्वा नारदस्य गर्वः व्यपगतः ।

**४. क्रमसंयोजनेन जीवनवृत्तं पूरयत** **०.५×१०=५**

माधवशरणोपाध्यायः नव्यव्याकरणाचार्यः अस्ति ।

ओखलढुङ्गा-जनपदस्य नर्मदेश्वरग्रामविकाससमित्याम् जातः ।

स विद्याविरिधिकः अपि अस्ति ।

१९५५ ईस्वीयवर्षस्य डिसेम्बरमासस्य १५ तारिकायां जातः ।

अयं विद्वान् राष्ट्रिय-पाठ्यक्रम-परिषद्यपि कार्यसम्पादनमकरोत् ।

तत्कालिक-महेन्द्र-संस्कृतविश्वविद्यालयस्य शिक्षाध्यक्षः अभवत् ।

इदानीमपि अयं विविधासु प्राज्ञिकसंस्थासु प्राज्ञिकं कार्यं सम्पादयति ।

ऋतम्भरा-मर्यादा-अरुणोदय-इत्याद्यासु पत्रिकासु अस्य अनुसन्धानमूलाः लेखरचनाः प्रकाशिताः सन्ति ।

अयं विश्वविद्यालयस्य, सर्वकारस्य च विभिन्नासु प्राज्ञिकसमितिषु संलग्नः अस्ति ।

अनेकैः पारितोषिकैः सम्मानैश्च अयं सम्मानितः अस्ति ।

**५. कोष्ठकस्य निर्देशनमाधृत्य प्रदत्तमनुच्छेदं पूरयत** **१×८=८**

मम नाम .........(स्वनाम) अस्ति । अहम् एकादशी-कक्षायां पठामि । मम महाविद्यालयस्य नाम .......... अस्ति । महाविद्यालयस्य भवनम् अतीव ............. (विशाल) आकर्षकम् च अस्ति । मम महाविद्यालये बहवः ....... (छात्र) पठन्ति । अत्र बहवः ........ (शिक्षक) सन्ति । महाविद्यालयस्य ........... (वातावरण) आनन्दप्रदम् अस्ति । विद्यालयस्य कीडाक्षेत्रे छात्राः .........(कीड्) । विद्यालये प्रातःकाले प्रार्थना भवति । अस्माकं महाविद्यालये अनुशासनस्य स्थानं महत्त्वपूर्णम् अस्ति । अत्रत्याः सर्वे छात्राः ............... (अनुशासन) पालयन्ति, अध्यापकानां सम्मानञ्च कुर्वन्ति ।

**६. मञ्जूषायां प्रदत्तपदैः रिक्तस्थानपूरणेन चित्रवर्णनं पूरयत** **१×८=८**



(क) अत्र चित्रे ................दृश्यं वर्तते ।
(ख) अत्र ................ जनाः सन्ति ।
(ग) निकटे एकः विशालः ............वर्तते ।
(घ) एकः .............भरतमिलापं पश्यति ।
(ङ) अत्र सर्वे ..............सन्ति ।
(च) अत्र सीता, रामः, शत्रुघ्नः, भरतः, ऋषिः, .............. च सन्ति ।
(छ) शत्रुघ्नः ............धारयति ।
(ज) सीतायाः गले ..............अस्ति ।

**मञ्जूषा**

| |
|---|
| ऋषिः, भरतमिलापस्य, मुकुटम्, षट्, लक्ष्मणः वृक्षः, प्रसन्नाः, हारः |

**७. निर्देशानुसारेण उत्तरयत**

(क) अन्वयपूरणम् **१×५=५**

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।**
**नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥**

**अन्वयः** कार्याणि ………… हि सिध्यन्ति, मनोरथैः …….. (सिध्यन्ति) । सुप्तस्य ……….. मुखे ……….. (स्वयं) नहि …………… ।

(ख) सरलार्थपूरणम् **१×५=५**

**ॐ विश्वानि देव सवितर्दुरितानि परासुव ।**
**यद् भद्रं तन्न आसुव ॥**

**सरलार्थः** हे देव ! …………. अशुभानि …….. अपाकुरु । यत् ……. कल्याणकरम् अस्ति, तत् तत् ………… प्रति ………… ।

**मञ्जूषा**

| |
|---|
| अस्मान्, प्रेरय, सर्वाणि तत्त्वानि, यत् |

**८. निर्देशानुसारेण उत्तरं दत्त**

**(क) अधोलिखितस्य पद्यस्य भावार्थं लिखत** **४**

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतिमान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ते ॥

**(ख) अधोलिखितं पद्यमाधृत्य विद्यायाः महिमानं चतुर्भिर्वाक्यैर्वर्णयत** **१×४=४**

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम् ॥

**९. अधस्तनयोर्वर्णयोः उच्चारणस्थानमाभ्यन्तरप्रयत्नञ्च निर्दिशत** **०.५×४=२**

म, य

**१०. कोष्ठस्थनिर्देशानुसारेण रिक्तस्थानं पूरयत** **१×५=५**

(क) भक्तः …………….. गच्छति । (मन्दिर, द्वितीया, एकवचनम्)
(ख) पर्यटकाः …………. आगच्छन्ति । (वायुयान, करणकारकम्)
(ग) घोटकाः शीघ्रं ……………… । (धाव्, लट्लकारः, बहुवचनम्)
(घ) नदी ……….. प्रभवति । (हिमालयः, पञ्चमी, एकवचनम्)
(ङ) ………….. सिंहः गर्जति । (वन, अधिकरणकारकम्)

**११. शब्दसङ्केताधारेण उचितपदैर्वाक्यपूर्तिं कुरुत** **१×५=५**

(क) वृक्षात् …………….. पतन्ति । (पत्र-शब्दः)
(ख) …………. विद्यालयं गच्छन्ति । (छात्र-शब्दः)
(ग) सा श्वः ……………… । (गम्-धातुः)
(घ) अहं ह्यः ……….. । (पठ्-धातुः)
(ङ) ………….. साफल्यं लभामहे । (अस्मच्छब्दः)

**<<<>>>**

# प्रश्नपत्रनिर्देशः

**कक्षा :** १२

**समयः** घण्टात्रयम् **पूर्णाङ्काः** ७५

**१. अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रश्नान् उत्तरयत**

**प्रथमः अनुच्छेदः**

विद्यार्थिजीवनस्य कृते गुरुभक्तिः तथैव अनिवार्या यथा ईश्वरभक्तिः अनिवार्या । गुरुभक्तिं विना न कोऽपि विद्यार्थी विद्यावान् भवितुमर्हति । अधुना नैतिकशिक्षायाः अभावेन नितान्तं चञ्चलता उच्छृङ्खलता अनुशासनहीनता च वृद्धिमाप्नुवन्ति । छात्राः स्वाध्यापकान् नैव सत्कुर्वन्ति । ते क्रीडासु कुसङ्गेषु चित्रपटदर्शनादिषु अमूल्यं समयं नाशयन्ति । ते सर्वत्र तिरस्कारं लभन्ते ।

**(क) एकपदेन उत्तरयत** **०.५×२=१**

(अ) कां विना विद्यार्थी विद्यावान् भवितुं न अर्हति ?

(आ) कस्याः अभावेन अनुशासनहीनता वृद्धिमाप्नोति ?

**(ख) एकवाक्येन उत्तरयत** **१×२=२**

(अ) छात्राः कुत्र समयं नाशयन्ति ?

(आ) अनुशासनहीनाः छात्रा किं लभन्ते ?

**(ग) निर्देशानुसारेण उत्तरयत** **१×३=३**

(अ) भक्ति-शब्दस्य लिङगं किम् ?

(आ) 'सत्कुर्वन्ति' इत्यत्र कः कालः ?

(इ) 'यथा ईश्वरभक्तिः अनिवार्या' इत्यत्र अव्ययपदं किम् ?

**द्वितीयः अनुच्छेदः**

अस्माकं परितः प्रसृतं वातावरणं पर्यावरणं कथ्यते । पर्यावरणस्य रक्षा अस्माकं परमं कर्तव्यम् अस्ति । पर्यावरणप्रदूणेन अस्माकं जीवनम् अपि शनैः रुग्णं भवति, क्षयं च प्राप्नोति । पर्यावरणस्य रक्षायै अस्माभिः स्वगृहाणां प्राङ्गणे पुष्पपादपाः रोपणीयाः । पुष्पपादपेषु विविधता भवतु । वृक्षाणां विनाशः दण्डनीयः अपराधः घोषयितव्यः । सर्वे प्रदूषणप्रसारपराः उद्योगाः नगरात् ग्रामात् वा दूरे स्थापनीयाः । कर्मस्थलानाम् अवकरः नदीषु न पातनीयः । गृहाणाम् अवकरः गृहेभ्यः दूरे पातनीयः । वाहनानां प्रयोगः न्यूनः कर्तव्यः । गृहस्य सर्वे सदस्याः पृथक् पृथक् वाहनेन न गच्छेयुः । पर्यावरणस्य रक्षणेन एव अस्माकं रक्षा भवति । यदि जनाः पर्यायवरणस्य रक्षायै कटिबद्धाः न भविष्यन्ति, तर्हि असाध्याः रोगाः वृद्धिं गमिष्यन्ति, प्रकृतिः च शनैः शनैः विनश्य मानवजीवनं बाधितं करिष्यति । अतः पर्यावरणस्य रक्षा प्राथमिकरूपेण करणीया ।

**(क) एकपदेन उत्तरयत** **०.५×२=१**

(अ) अस्माकं जीवनं केन रुग्णं भवितुं शक्नोति ?

(आ) पर्यावरणस्य रक्षणेन केषां रक्षा भवति ?

**(ख) एकवाक्येन उत्तरयत** **१×२=२**

(अ) कस्य रक्षायै अस्माभिः वाहनानां प्रयोगः न्यूनः कर्तव्यः ?

(आ) के नगरात् ग्रामात् वा दूरे स्थापनीयाः ?

**(ग) निर्देशानुसारेण उत्तरयत** **१×५=५**

(अ) 'करणीया' इत्यत्र प्रकृति-प्रत्ययौ कौ ?

(आ) 'असाध्याः' इति पदस्य विग्रहं प्रदर्शयत ?
(इ) 'पर्यावरणप्रदूषणेन' इत्यत्र समासनाम किम् ?
(ई) 'गमिष्यन्ति' इत्यत्र प्रयुक्तः लकारः कः ?
(उ) 'विविधता' इति पदस्य प्रकृति-प्रत्ययौ वियोजयत ।

**२. अधस्तनं श्रद्धाञ्जलिपत्रं मञ्जूषातः समुचितानि पदानि चित्वा पूरयत** **०.५×१०=५**

## प्रशंसापत्रम्

**सुश्रीः सुनीता थापा**

अनेन फिदिमग्रामेण ................. साप्ताहिके श्रीमद्भागवतज्ञानमहायज्ञे स्वयंसेवकरूपेण भागं ................कृतस्य ............कृते भवत्यै प्रशंसापत्रमिदं ................। आगामिनिषु च ..............सामाजिकेषु ................ भवदीयं मनः ............. भूयात्, भवति .......... आशिषः नितरां ........... इति च ................ ।

**संयोजकः** **दिनाङ्कः** २०७८ वैशाखः २०
**प्रदीपराज उपाध्यायः**
श्रीमद्भागवतज्ञानमहायज्ञः २०७८
फिदिमग्रामः, पाँचथर

| |
|---|
| गृहीत्वा, समायोजिते, प्रदीयते, योगदानस्य, कार्येषु, एतादृशेषु, संलग्नम्, सन्तु, भगवतः, कामयामहे |

**३. घटनासंयोजनेन कथां रचयत** **५**

अश्वं नीत्वा क्वचित् गच्छन्तौ पितापुत्रौ
पुत्रस्य आग्रहेण पिता अश्वारोहणं करोति ।
यात्रिणः जनाः - कीदृशः निर्दयः पिता अस्ति, स्वयम् अश्वारोहणं कृत्वा पुत्रं मार्गे चालयति ।
पिता अश्वात् अवरुह्य पुत्रः अश्वरोहणं करोति ।
जनाः कथयन्ति - कीदृशः शिष्टाचारहीनः पुत्रः, स्वयम् अश्वारोहणं करोति ।
पितापुत्रौ द्वावेव अश्वारोहणं कुरुतः ।
पथिकाः जनाः - कीदृशौ दयाहीनौ, लघुकायस्य अश्वस्य द्वयोः आरोहणम् !
द्वौ एव अश्वात् अवरुह्य अश्वेन सह मार्गे  चलतः ।
आलोचकाः - सङ्गे अश्वः अस्ति तथापि पदाभ्यां चलतः ।
लोकस्य प्रसादनम् असम्भवम्

**४. मञ्जूषासाहाय्येन अधस्तनं संलापं पूरयत** **०.५×१०=५**

आचार्यः (कक्षायाम्) अहो ! अद्य दिग्विजयः ....... दृश्यते ?
विनयः आचार्य ! स तु ........... । अतः विद्यालयं न ............ ।
आचार्यः शृणुत ! यदि ......... स्वास्थ्यनियमानां ........... कुर्याम, हितं मितं च भोजनं खादेम, तदा ......... न भवेम ।
कीर्तिः आचार्य ! के ....... नियमाः ?
आचार्यः ते नियमाः अस्मिन् 'स्वस्थवृत्तम्' इति पाठे 'चरकसंहिता'ग्रन्थात् सङ्कलिताः ।
कीर्तिः गुरुवर ! केन रचिता इयं ................ ?
आचार्यः महर्षिचरकेण ! ........... महान् खलु ........... ग्रन्थः ।

**मञ्जूषा**

| |
|---|
| रुग्णः, वयम्, न, पालनम्, आगच्छत्, ते, रुग्णाः, आयुर्वेदस्य, चरकसंहिता, अयम् |

**५. पदावलीनां साहाय्येन अनुच्छेदमेकं रचयत** **१×८=८**

एकस्मिन् वने एकः काकः ।
एकदा तस्य अन्यं वनं प्रति गमनम् ।
तत्र एकः आश्रमः ।
आश्रमे एकः ऋषिः ।
तत्र एकः भोजनालयः ।
भोजनालये एकः घटः ।
घटे अर्धं जलम् ।
तदन्तरं काकस्य बहिर्गमनम् ।
चञ्च्वा पाषाणखण्डान् गृहीत्वा पुनः पुनः घटे स्थापनम् ।
क्रमशः घटस्य जलस्य उपरि आगमनम् ।
काकस्य जलपानम् ।

**६. चित्रं दृष्ट्वा मञ्जूषासाहाय्येन चत्वारि वाक्यानि रचयत** **२×४=८**



**मञ्जूषा**

| |
|---|
| बालिका रोपयति, अस्ति, वृक्षैः, शुद्धम्, रोपणम्, कर्तव्यम्, वातावरणम्, पत्राणि |

**७. निर्देशानुसारेण उत्तरयत**

(क) अन्वयपूरणम् **१×५=५**

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।**
**तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता ॥**

**अन्वयः** सर्वे ............ प्रियवाक्यप्रदानेन .........., तस्मात् ........ प्रियं ............. । वचने .............. दरिद्रता ।

(ख) सरलार्थपूरणम् **१×५=५**

**ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यङ्करवावहै ।**
**तेजस्विनावधीतमस्तु मा विद्विषावहै ॥**

**सरलार्थः** हे देव ! आवां गुरुशिष्यौ सह एव .......... । .......... सह एव पराक्रमं करवाव । आवाभ्याम् अधीतं ............ अस्तु । आवां ............ परस्परं विद्वेषं न ............. ।

**मञ्जूषा**

| |
|---|
| आवाम्, कुर्याव, तेजस्वि, पालयतु, कदापि |

**८. निर्देशानुसारेण उत्तरं दत्त**

**(क) अधोलिखितस्य पद्यस्य भावार्थं लिखत** ४

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥

**(ख) अधोलिखितं पद्यमाधृत्य सच्चारित्र्यस्य महिमानं चतुर्भिर्वाक्यैर्वर्णयत** **१×४=४**

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

**९. अधस्तनानां वर्णानां प्राणत्वं सङ्केतयत** **०.५×४=२**

ज, झ, ङ, फ

**१०. कोष्ठस्थनिर्देशानुसारेण रिक्तस्थानं पूरयत** **१×५=५**

(क) पुत्रः वृद्धौ पितरौ ................ । (सेव्-धातुः, भूतकालः)
(ख) छात्रैः ............. गम्यते । (विद्यालय-शब्दः)
(ग) तेन श्वः भोजनं ................. । (कृ-धातुः)
(घ) मया ह्यः पाठः ........... । (लिख्-धातुः)
(ङ) त्वं तत्र .............. । (दृश्-धातुः, लट्लकारः)

**११. शब्दसङ्केताधारेण उचितपदैर्वाक्यपूर्तिं कुरुत** **१×५=५**

(क) ................ अत्र पश्यत । (युष्मच्छब्दः)
(ख) आवां............. रक्षामः । (धन-शब्दः)
(ग) धनिकः ................. भोजनं यच्छति । (याचक-शब्दः)
(घ) सा ........... न कुप्यतु । (अस्मच्छब्दः)
(ङ) .............. तत्र रमन्ते । (तच्छब्दः)

**<<<>>>**